साहित्यम्

शास्त्री
द्वितीय-खण्ड: मेघदूतम्
पूर्वमेघ:

DOMS Page No.
Date / /

⑨ तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो -
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥

प्रसंग → पद्यमिदं महाकवि कालिदास प्रणीतस्य मेघदूतारव्यखण्ड - काव्यस्य पूर्वमेघभागादुद्धृतमस्ति। अत्र कविः प्रियावियोग-सन्तप्तस्य यक्षस्य वर्षौ मेघावलोकनान्तरं स्वप्रियाजीवन विषये चिन्तनं वर्णयति। मेघसंदर्शनं सर्वेषां जनानां कृते सुखस्थितावापि चित्तविकाराय भवति, का कथा वियोगिनः इत्यभिधाय कविः यक्षचिन्तां समर्थयति।

व्याख्या — राजराजस्य = धनाधिपस्य कुबेरस्येत्यर्थः, अनुचरः = अनु = पश्चात् चरतीत्यनुचरः = सेवकः, अन्तर्वाष्पः = निरुद्ध नेत्राम्बुः, कौतुकाधानहेतोः = अभिलाषोत्पत्ति निमित्तस्य, तस्य = मेघस्य, पुरः = समक्षं, कथमपि = केनापि, स्थित्वा = आत्मनः स्थितिं विधाय, चिरम् = बहुकालं यावत्, दध्यौ = स्वप्रियां ध्यातवान्। मेघालोके = मेघावलोकने सति, सुखिनोऽपि = प्रिया-सहितस्यापि, चेतः = मनः, हृदयं, अन्यथावृत्ति = अन्यप्रकारम्, भवति = वर्तते, कण्ठाश्लेषप्रणयिनि = गलालिङ्गनाभिलाषिणि, जने = लोके, दूरसंस्थे = विप्रकृष्टे सति; किम् पुनः = किम् कथनीयम्।

विरहिणां जनानां कृते मेघदर्शनम् भीषण जनस्मरणाय कल्पते इति भावः। अत्राऽर्थान्तरन्यासालङ्कारः, उत्तरार्धे च कैमुतिकन्यायेन अर्थापत्तिरलङ्कारः।
मन्दाक्रान्ता वृत्तम्।

Renu Devi
23/09/20

राधा रमाकान्त सं० महावि० सुखसेना, पूर्णिया

(साहित्यम्) द्वितीय पत्रम्
उपशास्त्री
प्रथम-खण्ड किरातार्जुनीयम्-प्रथमसर्गः

Page No. Date / /

(2) अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः ॥

प्रसंग:- प्रस्तुतोऽयं श्लोकः महाकवि भारविविरचितः किरातार्जुनीयम् महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति ।

अस्मिन श्लोके वनेचरः तेन पदेषु सम्यक् विभज्य लम्भितैः विनियोगसत्क्रियैः उपायैः संघर्षम् उपेत्य इव परिबृंहितायतयः अर्थसम्पदः फलयन्ते ।

व्याख्या:→ तेन = राज्ञा, पदेषु = उपादेयवस्तुषु । सम्यक् = असंकीर्णं व्यस्तं च, विभज्य = विविच्य । विनियोगः = प्रयोगः, एव, सत्क्रिया = अनुग्रहः, सत्कार इति यावत्, लम्भिताः = स्थानेषु सम्यक्प्रयुक्ता इत्यर्थः । उपायाः = सामादयः । संघर्षं = परस्पर स्पर्धामुपेत्येवेत्युत्प्रेक्षा । परिबृंहितायतीः = प्रचितोत्तरकालाः । अर्थसम्पदः = धनधान्यादिसम्पत्तीः । अनारतं = अजस्रं, फलन्ति = प्रसुवते इत्यर्थः ।

शब्दार्थ:— तेन = उस दुर्योधन के द्वारा, पदेषु = उचित पदों (स्थानों या व्यक्तियों) में, सम्यक् = अच्छी प्रकार, विभज्य = विभाग करके, लम्भिताः = प्रयोग किये गए । विनियोगसत्क्रियाः = उचित प्रयोग करने से संस्कृत (अनुगृहीत) हुए, उपायाः = उपाय (साम, दान, भेद और दण्ड) । संघर्षम् = परस्पर स्पर्धा को उपेत्य इव = प्राप्त हुए से, परिबृंहितायतीः = परिबृंहिता = उन्नतशील है आयाति = भविष्य जिनका ऐसी, अर्थसम्पदः = धनधान्यादि सम्पत्तियों को, अनारतं = निरन्तर, फलन्ति = उत्पन्न करते हैं ।

Renu Devi
23/09/20

राधा उमाकान्त मं महाविद्यालय, पूर्णिया ।

साहित्यम् शास्त्री - प्रथम खण्ड

अभिज्ञान शाकुन्तलम्

पञ्चमोङ्कः

① भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥

प्रसंग एवं व्याख्या ⟶ प्रस्तुतोऽयं श्लोकः कविकुलकलाधरः कविता कामिनी वाग्विलासो महाकवि कालिदासो अभिज्ञान - शाकुन्तलम् नाट्य काव्यस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके प्रजापालनमात्मनो

धर्ममनुतिष्ठतां नृपतीनाँ क्षणमपि विश्रामस्यावकाशो न जायते इति वास्तविकीं स्थितिम् उदाहरणद्वारा समर्थयति कञ्चुकी — अर्थात् - लोकरक्षार्थं भगवान् भास्करः सृष्ट्यादावेकवारमेव स्वरथे नियुक्त तुरङ्गमोऽद्य यावत् भ्रमत्येव। न तदश्वाः कदापि रथाद् वियुज्यन्ते, न कदापि विश्राम्य - न्तीति भावः। विश्वप्राणधारको वायुः अहोरात्रं प्रवहत्येव, न कदापि विश्राम्यति, एवं शेषनागोऽपि सर्वदैव शिरो धृतधरित्रीमण्डलः तिष्ठति न कदापि स्वाधिकारात्क्षणमपि विरमति। प्रजोपार्जित धनादितः षष्ठभागाधिकारिणो राज्ञोऽपि प्रजापालनेऽविश्रामः आवश्यक कर्तव्यो विद्यते। राजा हि प्रजाभ्य- स्तदुपार्जित धनादेः षष्ठं भागं कररूपेण गृह्णाति। एवं च राज्ञां प्रजापालनात्मकं स्वीयं कर्तव्यमनुतिष्ठतां क्षणमात्र- मपि विश्रामस्यावसरोऽपि न भवतीति युक्तमेव। महाराजो दुष्यन्तः, धर्मासनादुत्थिताय विश्रामं करोति। अतः तस्मै इदानीमेव महर्षिकण्वशिष्यस्यागमनं नूनं निवेदयितुमुत्सहे इत्यर्थः।
अत्रमालापति वस्तूपमा - अप्रस्तुतप्रशंसा - श्रुत्यनुप्रास परिसंख्यालङ्कारा इन्द्रवज्राछन्दश्च ।

Renu Devi

23/09/20

राधा उमाकान्त सं० महावि० सुरसना, पूर्णिया ।